विलीयते अन्तर्लीना भवति । अवस्थाभेदादश्मरी शर्करा सिकता भवतीत्याह । अश्मर्य्येव च शर्करा चकरात् सिकता च भवति । शर्करासिकतयोश्च भेदो महत्त्वाल्पत्वाभ्यां बोद्धव्यः ॥ कथं अश्मरी शर्करा भवतीत्याह । सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते । सा अश्मरी ॥*॥ शर्करायाः पातमवरोधञ्च सहेतुकमाह ।

"अश्मरी वायुना भिन्ना सा तस्मिन्ननुलोमगे ।
निरेति सह मूत्रेण प्रतिलोमे विबध्यते ।
मूत्रस्रोतःप्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान्" ॥

सा अश्मरी । तस्मिन् वायौ । अनुलोमगे मूत्रस्रोतःसु सम्यक्प्रवृत्ते मूत्रेण सह सा शर्करा निरेति पतति । प्रतिलोमगे ऊर्द्ध्वप्रवृत्ते वायौ विबध्यते । तदा मूत्रस्रोतः श्रिता सक्ता लग्ना स्यात्तदा उपद्रवान् कुर्य्यात् । तानेवोपद्रवानाह ।

"दौर्ब्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिं ।
पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीड़नं वमिं" ॥

दौर्ब्बल्यमिन्द्रियाणां । सदनं अवसन्नत्वं । कार्श्यमङ्गानां । उदरैकदेशे शूलं । उष्णवातं मूत्राघातविशेषं ॥*॥ अश्मरी शर्करा सिकतानामरिष्टमाह ।

"प्रसूननाभिवृषणं बद्धमूत्रं रुजान्वितं ।
अश्मरी क्षपयत्याशु शर्करा सिकतान्विता" ॥

शर्करा सिकतेति च नामद्वयमन्वर्थं ॥*॥

अथाश्मर्य्याश्चिकित्सा ।

"शुण्ठ्यग्निमन्थपाषाणभिद्वरुणगोक्षुरैः ।
अभयारग्वधफलैः क्वाथं कृत्वा विचक्षणः ॥
रामठक्षारलवणचूर्णं दत्त्वा पिबेन्नरः ।
अश्मरी मूत्रकृच्छ्रञ्च नाशमायाति निखिलं ॥
क्वाथः शुण्ठ्यादिनामायं दीपनः पाचनः परं ।
हन्ति कोष्ठाश्रितं वातं कट्यरुग्वङ्क्षणमेढ्रजं" ॥

रुक्कुष्ठं ।

शुण्ठ्यादिक्वाथः ॥*॥

"एलोपकुल्यामधुकाश्मभेद-
कौन्तीश्वदंष्ट्रावृषकोरुबूकैः ।
श्रितं पिबेदश्मजतुप्रगाढ़ं
सशर्करं मूत्रगदेऽश्मरीषु" ॥

उरुबूक एरण्डस्तस्यात्र मूलं । मूत्रगदे मूत्रकृच्छ्रे ।

एलादिक्वाथः ॥*॥

"कुष्माण्डकरसं हिङ्गुयवक्षारयुतं पिबेत् ।
वस्तौ मेढ्रे शूलयुक्ते अश्मरीशर्कराञ्जयेत्" ॥*॥

"वरुणत्वक्शिलाभेदशुण्ठीगोक्षुरकैः कृतः ।
कषायक्षारसंयुक्तः शर्करां पातयत्यधः" ॥

क्षारो यवक्षारः ॥*॥

"त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतं ।
अवीक्षीरेण सप्ताहादश्मरीनाशनं पिबेत्" ॥

अवीर्म्मेषी ॥*॥

"वरुणत्वक्कषायस्तु पीतो गुड़समन्वितः ।
अश्मरीं पातयत्याशु वस्तिशूलञ्च नाशयेत्" ॥*॥

"क्वाथो वरुणमूलस्य तस्य कल्केन संयुतः ।
शिग्रुमूलस्य च क्वाथः कदूष्णश्चाश्मरीं हरेत्" ॥*॥

"शृङ्गवेरयवक्षारपथ्याकालीयकान्वितः ।
दधिमण्डो भिनत्त्युग्रामश्मरीमाशु पानतः" ॥

शृङ्गवेरं नागरं ॥*॥

"नो जग्धं कृमिभिर्घनं सुतरुणं स्निग्धं शुचिस्थानजं
घस्रे पुण्यनिरीक्षिते वरुणकं छित्त्वा तुलां ग्राहयेत् ।
संग्राह्यास्य चतुर्गुणाम्ब्वपि पचेत् पादावशेषं जलं
तत्तुल्येन गुड़ेन वै दृढ़तरे भाण्डे पचेत्तत् पुनः ॥
यात्येवं घनतां गुड़े परिणते प्रत्येकमेषां पलं
शुण्ठ्यैर्व्वारुकबीजगोक्षुरकपाषाणभिच्छीतला ।
कुष्माण्डत्रपुषाक्षबीजकुनटीवालूकशोभाञ्जनं
द्राक्षैलागिरिजाभयाकृमिहृतां चूर्णीकृतानां क्षिपेत् ॥
पथ्याशी प्रतिवासरं गुड़ममुं योऽक्षप्रमाणं नरः
खादेत्तस्य समस्तदोषजनिताश्मर्य्यः पतन्ति ध्रुवं" ।

एर्व्वारुकबीजं कर्कटीबीजं । पाषाणभित् छाया-छोड़ीति लोके । शीतला नीलदूर्व्वा । तथाच ।

"नीलदूर्व्वा स्मृता शस्यं शाद्वलं हरितं तथा ।
शतपर्व्वा शीतकुम्भी शीतला वामनी तथा" ॥

इति निर्घण्टौ धन्वन्तरिः ॥ कुनटी धान्यकं । गिरिजं शिलाजतु । कृमिहृत् विड़ङ्गं । वरुणादिगुड़ः ॥*॥

"मञ्जिष्ठा त्र्यूषणं बीजं जीरकः शतपुष्पिका ।
धात्रीफलं वदरकं गन्धकञ्च मनःशिला ॥
एतेषां समभागानां चूर्णं टङ्कमितं नरः ।
भक्षयेन्मधुना सार्द्धं पतेत्तस्याश्मरी ध्रुवं" ॥*॥

"पलद्वयमितं क्वाथो कुलत्थस्य शृते तु यः ।
लवणं शरपुङ्खस्य सार्द्धमाषद्वयोन्मितं ॥
क्षिप्त्वा पिबेत् पतेत्तस्य मूत्रेण सममश्मरी ।
शर्करा सिकता चापि दृष्टमेतदनेकधा" ॥

इत्यश्मर्य्यधिकारः ॥*॥ इति भावप्रकाशः ॥

(अस्या निरुक्तिमाह भोजः ।

"तुल्यतामश्मना याति तस्मात्तामश्मरीं विदुः" ।

इति माधवकृतरुग्विनिश्चयस्यान्यतमटीकाकृतोक्तं ॥

"पित्तमारुतदोषेण अथवा मूत्ररोधनात् ।
अतिपथ्याद्व्यभिचारैर्जायते चाश्मरीगदः ॥
मूत्राविष्टौ च पितरौ सुरतं कुरुतो यदि ।
मूत्रेण सहितं शुक्रं च्यवते गर्भसम्भवं ॥
पञ्चजस्य स्वदेहस्य स च तत्र प्रजायते ।
मूत्रं मूत्रस्य संस्थाने करोति बन्धनं त्रिषु ॥
सोऽप्यसाध्यो मूत्रगदश्चाल्पाद्भवति मानुषे ।
तारुण्ये चापि साध्यश्च जायते मूत्रशर्करा ॥
विपरीतेन चोत्ताने स्त्रिया च पुरुषेण वा ।
शुक्रञ्च प्रवहेत्तस्य स्त्रीशुक्रं विधिभीति च ॥
पुनश्च मेहने वासः वातेन शोषितश्च तत् ।
इयं दत्तं प्रपद्येत मूत्रद्वारं रुणद्धि च ॥
तेन मूत्रप्ररोधश्च जायते तीव्रवेदना ।
अण्डसन्धिस्थिता याति शर्करा शस्त्रसाधिका ॥
अतो वक्ष्यामि भैषज्यं शृणु पुत्र ! महामते" ।

अस्याश्चिकित्सा यथा ॥

"शुण्ठीगोक्षुरकस्यैव वरुणस्य त्वचस्तथा ।
क्वाथो गुड़यवक्षारयुतश्चाश्मरिनाशनः ॥ १ ॥
गोक्षुरकस्य बीजानां धातुमाक्षिकसंयुतं ।
चूर्णं माक्षिकदुग्धेन पानश्चाश्मरिपातनं" ॥ २ ॥

अस्यां पथ्यानि यथा ॥

"पुराणयष्टिकाशालिरक्तकतण्डुलकास्तथा ।
श्यामाकः कोद्रवोद्दालो मर्कटीदग्धधान्यकं ॥
कुलत्थयवगोधूमास्तथाचैवाढ़की भिषक् ।
वातघ्नाश्च प्रयोक्तव्या भोजने वातरोगिणां ॥
कौशाद्यानि च मांसानि पथ्यान्यश्मरिनाशने" ॥

इति हारीतः ॥

"विशोषयेद्वस्तिगतन्तु शुक्रं
मूत्रं सपित्तं पवनः कफं वा ।
यदा तदाश्मर्य्युपजायते तु
क्रमेण पित्तेष्विव रोचना गोः ॥
कदम्बपुष्पाकृतिरश्मतुल्या
श्लक्ष्णा त्रिपुट्यप्यथवापि मृद्वी ।
मूत्रस्य चेन्मार्गमुपैति रुद्धा
मूत्रं रुजां तस्य करोति वस्तौ ॥
ससेवनीमेहनवस्तिशूलं
विशीर्णधारञ्च करोति मूत्रं ।
मृद्नाति मेढ्रं स तु वेदनार्त्तो
मुहुः शकृन्मुञ्चति मेहते च ॥
क्षोभात् क्षते मूत्रयतीह सासृक्
तस्याः सुखं मेहति च व्यपायात् ।
एषाश्मरी मारुतभिन्नमूर्त्तिः
स्याच्छर्करामूत्रपथात् क्षरन्ती" ॥*॥

चिकित्सा यथा ॥*॥

"क्रिया हिता लघ्वसरिग्वर्कराभ्यां
कृच्छ्रे तथैवेह कफानिलाभ्यां ।
कार्य्याश्मरीभेदनपातनाय
विशेषयुक्तं शृणु कर्म्मसिद्धं ॥
पाषाणभेदं वृषकं श्वदंष्ट्रा-
पाठाभयाव्योषशठीनिकुम्भाः ।
हिंस्रीखराश्वासितिमारकाख्या-
मेर्व्वारुकाणां त्रपुषस्य बीजं ॥
उपकुञ्चिका हिङ्गु सवेतसाम्लं
स्याद् द्वे बृहत्यौ हपुषा वचा च ।
चूर्णं पिबेदश्मरिभेदि पक्वं
सर्पिश्च गोमूत्रचतुर्गुणान्तैः ॥ १ ॥
शिग्रोस्तु यूषो मृदुमूलकल्का-
द्दिव्यप्रमाणादहृततैलभक्तात् ।
शीतोऽश्मभित्स्याद्दधिमण्डयुक्तं
पेयः प्रकामं लवणेन युक्तः ॥ २ ॥
जलेन शोभाञ्जनमूलकल्कः
शृतो हितश्चाश्मरिशर्कराभ्यां ॥ ३ ॥
पीत्वा च मद्यं निगदं रथेन
हयेन वा शीघ्रजवेन यायात् ।
तैः शर्करा प्रच्यवतेऽश्मरी तु
शाम्येन्नचेच्छल्यविदुद्धरेत्तां" ॥ ४ ॥

अस्यां वर्ज्जनीयान्याह ।

"व्यायामसन्धारणशुष्कभक्ष्य-
पिष्टान्नवातार्क्ककरश्ववायान् ।
खर्ज्जूर-शालूक-कपित्थ-जम्बु
बिसं कषायञ्च रसं भजेन्न" ॥

इति च चरकः ॥)

चतस्रोऽश्मर्य्यो भवन्ति । श्लेष्मणा वातेन पित्तेन